श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीरामचन्द्र विरचितं

# ॥ श्री नृसिंहपञ्चामृतस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री नृसिंहपञ्चामृतस्तोत्रम् ॥

अहोबिलं नारसिंहं गत्वा रामः प्रतापवान्।
नमस्कृत्वा श्रीनृसिंहं अस्तौषीत् कमलापतिम् ॥ 1 ॥

गोविन्द केशव जनार्दन वासुदेव
विश्वेश विश्व मधुसूदन विश्वरूप।
श्रीपद्मनाभ पुरुषोत्तम पुष्कराक्ष
नारायणाच्युत नृसिंह नमो नमस्ते ॥ 2 ॥

देवाः समस्ताः खलु योगिमुख्याः
गन्धर्व विद्याधर किन्नराश्च।
यत्पादमूलं सततं नमन्ति
तं नारसिंहं शरणं गतोऽस्मि ॥ 3 ॥

वेदान् समस्तान् खलु शास्त्रगर्भान्
विद्याबले कीर्तिमतीं च लक्ष्मीम्।
यस्य प्रसादात् सततं लभन्ते
तं नारसिंहं शरणं गतोऽस्मि ॥ 4 ॥

ब्रह्मा शिवस्त्वं पुरुषोत्तमश्च
नारायणोऽसौ मरुतां पतिश्च।
चन्द्रार्क वाय्वग्नि मरुद्गणाश्च
त्वमेव तं त्वां सततं नतोऽस्मि ॥ 5 ॥

स्वप्नेऽपि नित्यं जगतां त्रयाणां
    स्रष्टा च हन्ता विभुरप्रमेयः।
त्राता त्वमेकस्त्रिविधो विभिन्नः
    तं त्वां नृसिंहं सततं नतोऽस्मि ॥ **6** ॥

इति स्तुत्वा रघुश्रेष्ठः पूजयामास तं विभुम्।
पुष्पवृष्टिः पपाताशु तस्य देवस्य मूर्धनि ॥
साधु साध्विति तं प्रोचुः देवा ऋषिगणैस्सह ॥ **7** ॥

देवा ऊचुः
राघवेण कृतं स्तोत्रं पञ्चामृतमनुत्तमम्।
पठन्ति ये द्विजवराः तेषां स्वर्गस्तु शाश्वतः ॥ **8** ॥

॥ श्री नृसिंहपञ्चामृतस्तोत्रं समाप्तम् ॥